E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.319
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870
Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# प्रमाणशास्त्रीयपदार्थेषु जातिनिग्रहस्थानयोः स्वरूपविमर्शः

**डॉ. किशोरकुमारः**
**सहायकाचार्यः,**
**दर्शनविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः,**
**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**
**dr.kishor.kumar@sanskrit.ac.in**

**सारः -** अक्षपादगौतमप्रणीतस्य भारतीयदर्शनपरम्परायां 'प्रमाणशास्त्रम्' 'तर्कविद्या' वेति नाम्ना प्रथितदर्शनशास्त्रस्य मुख्यम् उद्देश्यं प्रमाणैः प्रमेयपरीक्षणेन तत्त्वज्ञानात् निःश्रेयसस्य अधिगमः वर्तते। तत्त्वज्ञानप्राप्तौ एकं प्रमुखं साधनं 'वादः' इति न्यायशास्त्रज्ञाः मन्यन्ते। वादप्रक्रियायां सदसत्पक्षयोः निर्णयार्थं, चर्चायाः अनुशासनाय च महर्षिणा गौतमेन षोडशपदार्थानां विवेचनं कृतम्। तेषु प्रमाण-प्रमेयादयः तत्त्वज्ञानस्य साक्षात्साधनभूताः, परन्तु वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानि वादस्य प्रक्रियात्मकानि अङ्गानि, येषां ज्ञानं वादे विजयप्राप्तये तथाच परपक्षस्य दौर्बल्यं ज्ञातुम् अनिवार्यम्। न्यायदर्शने 'जातिः' तथा 'निग्रहस्थानम्' केवलं तार्किकदोषौ न स्तः, अपितु तौ वादशास्त्रस्य अनुशासनात्मकौ स्तम्भौ वर्तेते। 'जातिः' असदुत्तरेषु विद्यमानां तार्किकवञ्चनां प्रकाशयति, यया कश्चित् स्वस्य अज्ञानं छादयितुं प्रयतते। 'निग्रहस्थानम्' तु वादचर्चायां सम्भाव्यमानानां सर्वेषां स्खलनानां, त्रुटीनां, तथा च पराजयकारणानां व्यवस्थितं वर्गीकरणं प्रस्तौतीत्यनयोः विवेचनम्

अस्मिन् पत्रे प्रस्तूयते। अतिविस्तरात् जातिनिग्रहस्थानयोः भेदानां विस्तृतं निरूपणमत्र नाभिहितम्।

**कूटशब्दाः - जातिः, निग्रहस्थानम्, साधर्म्यम्, वैधर्म्यम्, विप्रतिपत्तिः, अज्ञानम्, विक्षेपः, जात्युत्तरम्, वादः, जात्युत्तरम्, तत्त्वनिर्णयः, अप्रतिपत्तिः।**

## जातिपदार्थस्य लक्षणं स्वरूपं च

व्युत्पत्तिदृष्ट्या, 'जनि' धातोः क्तिन् प्रत्ययान्तं रूपं 'जातिः'। यस्मात् यदुत्पद्यते, तदेव जातिभावेन निर्दिश्यते। वैशेषिकदर्शने यद् 'सामान्यम्' इत्याख्यः चतुर्थः पदार्थः निरूपितः, तदनुसारं मनुष्यत्वं, घटत्वं, पटत्वं, अश्वत्वं च सामान्यधर्माः इत्यभिधीयन्ते। न्यायदर्शने तु एते एव सामान्यधर्माः 'जाति'शब्देन व्यवह्रियन्ते।

अमरकोषेऽपि उक्तं – **"जातिः सामान्यजन्मनोः।"**[1] अतः, सामान्यरूपं जातिशब्दस्य मुख्यं अर्थरूपं प्रतीयते। यद्यपि जातिशब्दस्य अनेके अर्थाः - जातिः = सामान्यं, जातिः = वर्णः, जातिः = उत्पत्तिः इत्यादयः, प्रयुक्ताः सन्ति, तथापि न्यायसूत्रे निर्दिष्टं 'जाति'पदं विशिष्टं पारिभाषिकम्।

अत्र न 'सामान्यजातिः' नापि 'वर्णजातिः', किं तु विवादप्रसङ्गे प्रतिवादिनः असदुत्तरविशेषः, स एव 'जातिः'।

प्रमाणशास्त्रीयेषु षोडशपदार्थेषु जातिः निग्रहस्थानञ्चेति द्वौ पदार्थौ परिगणितौ। न्यायसूत्रे महर्षिगौतमः जातेः लक्षणम् एवं प्रस्तौति -

---

[1] अमरकोशः, तृतीयकाण्ड. ६८

**"साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः"**[2] यदा कश्चित् वादी स्वपक्षं साधयितुं हेतुं प्रयुङ्क्ते, तदा प्रतिवादी तस्य हेतोः वास्तविकखण्डने असमर्थः सन्, केवलं साधर्म्यस्य वैधर्म्यस्य (असमानतायाः) वा आधारेण असदुत्तरं (दूषणाभासम्) उक्त्वा तत्पक्षस्य खण्डने प्रवर्तते, तदेव 'जातिः' इति कथ्यते।

जातिः वस्तुतः 'असदुत्तरम्'। अत्र प्रतिवादी वादिनः हेतौ विद्यमानं व्याप्तिसम्बन्धं खण्डयितुं न प्रभवति, अपितु केवलं बाह्यसादृश्यम् आधारीकृत्य एकं प्रत्युदाहरणं प्रस्तौति, येन भ्रमः उत्पद्यते।

**उदाहरणं यथा-**

- **वादी :** "शब्दः अनित्यः, कृतकत्वात्, घटवत्।"
    - **प्रतिज्ञा :** शब्दः अनित्यः
    - **हेतुः :** कृतकत्वम्
    - **उदाहरणम् :** घटः

अत्र वादिनः समीचीनः तर्कः, यतः 'कृतकत्वम्' 'अनित्यत्वेन' सह व्याप्तिसम्बन्धेन सम्बद्धम्। यत् यत् कृतकं भवति, तत् तत् अनित्यं भवति, यथा घटः।

**प्रतिवादी (जातेः प्रयोगं कुर्वन्):** "यदि घटवत् कृतकत्वरूपसाधर्म्येण शब्दस्य अनित्यत्वं सिद्ध्यति, तर्हि आकाशवत् अमूर्तत्वरूपसाधर्म्येण शब्दस्य नित्यत्वं किं न सिद्ध्येत्?"

अत्र प्रतिवादी वादिनः हेतोः (कृतकत्वस्य) अनित्यत्वेन सह व्याप्तिं न खण्डयति, अपितु एकम् अन्यं साधर्म्यं (अमूर्तत्वम्) प्रदर्शयति। शब्दः आकाशेन सह अमूर्तत्वरूपधर्मेण समानः। आकाशश्च नित्यः। अतः शब्दोऽपि नित्यः भवेत्।

---

[2] न्या.सू. १.२.१८

- **दोषः -** प्रतिवादिना प्रदर्शितं साधर्म्यम् (अमूर्तत्वरूपं) 'अप्रयोजकम्'। नित्यत्वस्य प्रयोजकं कृतकत्वम् अकृतकत्वं वा भवति, न तु मूर्तत्वम् अमूर्तत्वं वा। यद्यपि आकाशः अमूर्तः नित्यश्च, तथापि तयोः व्याप्तिसम्बन्धाभावः। अतः केवलं सादृश्यस्य आधारेण प्रस्तुतम् इदमुत्तरं वास्तविकं खण्डनपरं न भवति, अपितु जातिरेवेति। इदं 'साधर्म्यसमा जातिः' इत्युच्यते।

वाचस्पतिमिश्रः अस्य सूत्रस्य व्याख्यायां **"प्रतीपावस्थानं प्रत्यवस्थानम्"**[3] इति विवृणोति। तेनोक्तं- प्रतिकूलभावेन यत्स्थितिर्भवति, तदेव प्रत्यवस्थानं; एवञ्च, वादिनः प्रतिकूलभावरूपा या प्रतिवादिनः स्थिति, सा 'प्रत्यवस्थानम्' इति कथ्यते। यदा वादिनः पक्षे कश्चन, तस्य पराजयहेतोः विपरीतं तद्विपक्षरूपं च यत् प्रतिपादनं करोति, तदा तत् **जातिः** इति निगद्यते। यदि केवलं **"प्रत्यवस्थानं जातिः"** इत्येव लक्षणं स्वीकृतं स्यात्, तर्हि शङ्का जायते - यतः प्रत्यवस्थानं छलादिषु अपि दृश्यते। छलपदार्थेऽपि प्रतिवादी वादिनः प्रतिकूलस्थितिं गृह्णाति; तर्हि तत्रापि जातिप्रसङ्गः स्यात्। अतः सूत्रकारेण केवलं 'प्रत्यवस्थानं' न उक्तम्, अपि तु 'साधर्म्यवैधर्म्याभ्यां' इति पदं लक्षणे योजितम्।

अतः जातिलक्षणस्य समग्रभावार्थः अयं यत् – साधर्म्यं वैधर्म्यं वा आधारं कृत्वा प्रतिवादिना या प्रतिकूलावस्था क्रियते, सा एव जातिरिति। प्रतिवादिना यः प्रतिषेधः क्रियते, सः व्याप्तिनिरपेक्षः भवति। इदं तात्पर्यम् - अविनाभावसम्बन्धं (व्याप्तिं) अनपेक्ष्य, केवलं साधर्म्यवैधर्म्यदृष्ट्या वादिनः कथनस्य दोषोद्भावनं यत्र क्रियते, तदेव जातिप्रयोगः।

अतः न्यायसूत्रवृत्तिकारेण विवृतम् - साधर्म्यवैधर्म्याभ्याम् इति सावधारणनिर्देशः, तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः। एवं

---

[3] न्याय.वा.ता.टी. सूत्र.1/2/18

व्याप्त्यपे-क्षाहीनत्वात् प्रतिवादिनः एषः प्रकारः असदुत्तर इति कथ्यते। तर्कभाषायां यथोक्तम् -**“असदुत्तरं जातिः।”**[4] यतः प्रतिवादिनः एषः व्याप्तिनिरपेक्षः असदुत्तररूपः प्रयत्नः वादिनः पक्षस्य वास्तविकदूषणं न भवति, किन्तु दूषणवत् आभासते। अतः जातिः ‘दूषणाभास’ इत्युच्यते।

प्रतिपादितं शङ्करमिश्रेण यथा-

**“व्याप्तिमपुरस्कृत्यासाधकत्व साधनाभिप्रायेण प्रयुक्तमुत्तरं जातिः, साधकताप्रयोजक-रुपेण, परासाधकतासाधनं वा । न तु सिद्धदूषणासमर्थमुत्तरं जातिः । प्रसिद्धस्यापि दूषणा-समर्थस्य जातित्वात् । यदि घटसाधर्म्यात् कृतकत्वादनित्यः शब्द इति, नित्यसाधर्म्यात् विभुत्वान्नित्यः किन्न स्यादिति प्रत्यवस्थानसम्भवात्”॥**[5]

यदा वादी स्वपक्षस्थापनाय हेतुं कथनं वा प्रस्तौति, प्रतिवादी च सदुत्तरस्याभावे, स्वपराजयान् निवारयितुमिच्छन् असदुत्तरस्य प्रयोगं करोति, तदा स जात्युत्तरं भवति।

यथोक्तम् -

**“जातिः तु विरोधिनिष्कर्षनिष्कासने मिथ्याप्रश्नोत्थापने वा, प्रतिद्वन्द्विनं पराजेतुमभिप्रायेण क्रियमाणेषु कार्येषु भवति।”**[6]

इयं जातिः यद्यपि असदुत्तरं, तथापि वास्तविकोत्तरस्य स्थाने प्रयुज्यमाना ‘जात्युत्तर’ इति संज्ञां लभते। एवं च, वादिनः कथनस्य दूषणं न सत्यमपि, तात्कालिकतया सत्यवत् प्रतीतिर्भवति, तस्मात् जातिः ‘दूषणाभासः’ इत्युच्यते।

---

4 तर्कभाषा, जातिनिरूपणप्रकरणम्, पृ.३९६

5 वादविनोदः, जातिनिरुपणम्

6 History of Indian Philosophy, Vol. 1 तः अनूदितम्

बौद्धनैयायिकः धर्मकीर्तिः 'न्यायबिन्दु'ग्रन्थे प्रतिपादयति – **"दूषणाभासास्तु जातयः।"**[7]

एवमेव जैनदर्शने हरिभद्रसूरिः लिखति –

**"जातयो दूषणाभासाः, पक्षादिदूष्यते न यैः।"**[8]

प्रतिवादिना प्रयुक्तं जात्युत्तरं वादिनः कथनं न प्रतिषेधति, अपिच वादी अपि तुल्ययुक्त्या प्रतिवादिनः उक्तौ जात्युत्तरं प्रतिपादयितुं शक्नोति। अत एव, प्रतिवादिनः ईदृशमुत्तरं परोक्षतः स्वव्याघातकम् एव भवति; अतः जातिः स्वव्याघातकमुत्तर इति परिभाष्यते। अत्रेदं ज्ञातव्यं यत् - प्रतिवादिना स्वपक्षसिद्धये प्रयुक्तो हेतुर्वा हेत्वाभासो वा जातिरिति नाभिधीयते। वादिनः उक्ते हेतौ दोषप्रदर्शनार्थं यदसदुत्तरं प्रयुज्यते, तदेव जात्युत्तरम्।

महर्षिवात्स्यायन-उद्द्योतकर-जयन्तभट्ट-उदयनाचार्य-इत्यादीनां नैयायिकाचार्याणां मतानुसारेण, प्रतिवादिना यदसदुत्तरं दूषणाभासरूपेण वादिनः कथनदूषणार्थं प्रयुज्यते, तत् जात्युत्तरम् इत्यभिधीयते।

तस्मात् एव आचार्यवरदराजः 'तार्किकरक्षा'ग्रन्थे स्पष्टमाह-

**"प्रयुक्ते स्थापनाहेतौ दूषणाशक्तमुत्तरम्। जातिमाहुः..........**[9]**।**
अत्र सिद्धत्वेऽपि दूषणासामर्थ्यशक्तिः। ततश्च छलादिव्यवच्छेदसिद्धिरिति।
अथ न्यायाचार्याभिमतं लक्षणमाह - **अथान्ये तु स्वव्याघातकमुत्तरम्॥"**[10]

---

[7] न्यायबिन्दुः, 3/139

[8] *Ṣaḍdarśanasamuccayaṭīkā* of Haribhadra Sūri

[9] तार्किकरक्षा, द्वितीयपरिच्छेदः

[10] तार्किकरक्षा, द्वितीयपरिच्छेदः. १ कारिका.

यत् उत्तरं स्थाप्यहेतौ दूषणं कर्तुमशक्तं, तत् 'जातिः' इत्युच्यते; अन्ये तु तं प्रकारं 'स्वव्याघातकमुत्तरम्' इति निर्दिशन्तीत्यर्थः।

एवमेव वृत्तिकारः विश्वनाथाचार्यः अपि एतयोः मतयोः समन्वयपूर्वकं वदति यत् -

**"छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितम्।"**[11]

अतः छलादिभ्यः पृथक्, दूषणासमर्थं यदुत्तरं, स्वपक्षहानिकरं च भवति, तदेव जातिसंज्ञकं दूषणाभासरूपम्।

महर्षिः गौतमः षोडशपदार्थानां मोक्षसाधनत्वेन निरूपणं कृत्वा, हेत्वाभासस्य अनन्तरं 'छलस्य', पश्चाच्च 'जातेः' उल्लेखं कृतवान्।

अत्र शङ्कोदेति यत्- "किं हेतोः छलस्यानन्तरं जातेः निर्देशः?" यतः छलम् अपि असदुत्तरमेव, तथापि 'जातिः' तस्मादपि निकृष्टतरत्वात् अन्ते निर्दिष्टा। छले हेत्वाभासस्य उपजीवनं दृश्यते, यतः छलं हेत्वाभासमाश्रित्य एव वादिनं भ्रमयति। जातिः तु स्वव्याघातकत्वात् अत्यन्तासदुत्तरत्वेन अपि निन्द्यतमा। अतः न्यायसूत्रे हेत्वाभासानन्तरं छलस्य, ततः परं जातेः क्रमः युक्तिपूर्णः।

विश्वनाथाचार्यः अपि तदर्थं स्पष्टं व्याचष्टे -

**"...ततश्च हेत्वाभासोपजीवनेन छलस्य स्वव्याघातकत्वेन अत्यन्तासदुत्तरत्वात् ततो जातेः"**[12]

अयमर्थः- हेत्वाभासस्य आश्रयत्वात् छलस्य निर्देशः कृतः जातेः तु स्वव्याघातकत्वात् अत्यन्तम् असदुत्तरत्वं, अतः तदनन्तरं जातेः निर्देशः।

---

[11] न्या.सू.वृ. अध्याय.१. ५४

[12] न्याय.सू.वृ. १.१.१

एवं स्पष्टीकृतं भवति यत् 'छलं' हेत्वाभासाश्रितम्, 'जातिः' तु छलादपि अधमत्वेन गण्यते। यतः छलं केवलं परं मोहयति, जातिः तु स्वपक्षं खण्डयित्वा पराजयं साधयति।

एवं न्यायदर्शनदृष्ट्या 'जातिः' इति दूषणाभासरूपा तर्कविपर्यासजननी इत्यवगम्यते। एषा न केवलं वादकौशलस्य विषयः, अपितु तर्कशास्त्रस्य सूक्ष्मप्रत्यवस्थानतत्त्वस्य द्योतिकापि।

**जातेः भेदाः -**

न्यायसूत्रे पञ्चमेऽध्याये मुनिना जातेः भेदाः सूत्रिताः –**"साधर्म्य-वैधर्म्य-उत्कर्ष-अपकर्ष-वर्ण-अवर्ण-वैकल्प-साध्य-प्राप्ति-अप्राप्ति-प्रसङ्ग-प्रतिदृष्टान्त-अनुत्पत्ति-संशय-प्रकरण-अहेतु-अर्थापत्ति-अविशेष-उपपत्ति-उपलब्धि-अनुपलब्धि-अनित्य-नित्य-कार्य-समा"**[13] इति।

अत्र 'साधर्म्य'शब्दादारभ्य 'कार्य'शब्दपर्यन्तं चतुर्विंशतिशब्दानां द्वन्द्वसमासे परं प्रयुक्तः 'समा'शब्दः "द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकं सम्बध्यते" (व्याकरणनियमः) इत्यनेन नियमेनेति सर्वैः शब्दैः सम्बध्यते।

'जाति'शब्दः स्त्रीलिङ्गत्वेन प्रचलितः, अतः तस्य भेदाः 'साधर्म्यसमा', 'वैधर्म्यसमा' इत्यादयः स्त्रीलिङ्गान्ताः एव।

यद्यपि गौतममुनिना जातेः चतुर्विंशतिभेदाः सूचिता एव, तथापि तेषां परिमितत्वं न सिध्यति।

वार्तिककारेण स्पष्टं निर्दिष्टम् - **"न अवधारणात् - नेदमवधार्यते चतुर्विंशतिजातय इति।"**[14]

---

13 न्या.सू. – ५.१.१

14 न्यायभाष्य, ५।१।६।

एतदवधार्यं न यत् चतुर्विंशतिरेव जातयः; अन्याः अपि सम्भवन्ति। इदं तात्पर्यम् - महर्षिणा गौतमेनोक्ताः जातयः केवलं दृष्टान्तरूपेण प्रदर्शिताः, न तु तासां सङ्ख्या निश्चिततया निर्णीता। एवं भामहाद्यालङ्कारिकैरपि दूषणाभासभूतं जातिसंज्ञकं विविधान्यभेदान्तररूपं स्वीकृतम्। बौद्धजैनदर्शनयोरपि न्यायसम्मतानां चतुर्विंशतिजातीनां परिमितिमतिक्रान्ताः अनेकभेदाः स्वीकृताः सन्ति।

**वादादिकथासु जातेः प्रयोगः**

शास्त्रेषु जातेः प्रयोगः कथं, किमर्थं च भवति इति प्रश्नः महत्त्वपूर्णः। अस्य उत्तरं वादविद्यायाः (शास्त्रार्थस्य) स्वरूपे निहितम्। जातेः प्रयोगः द्विविधेन उद्देश्येन भवति, यच्च प्रयोक्तुः अभिप्रायम् आश्रित्य निर्णीयते।

छलजातिपदार्थौ पुनः कथायाः अन्तर्गतयोः जल्पवितण्डयोः अङ्गविशेषौ स्तः। न्यायशास्त्रे वादः, जल्पः, वितण्डा इति त्रयः पदार्थाः कथानाम्ना उल्लिखिताः सन्ति।

महर्षिवात्स्यायनः स्वकीये भाष्ये यथा- **"तिस्रः कथा भवन्ति, वादो जल्पो वितण्डा चेति।"** शैवाचार्यः भासर्वज्ञः अस्याः 'कथायाः' लक्षणं भेदं च प्रस्तौति स्म - **"वादप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथा। सा द्विविधा - वीतरागकथा, विजिगीषुकथा चेति।"3**F[15] वादिप्रतिवादिनोः पक्षप्रतिपक्षावधारणं 'कथा' इति कथ्यते इत्यर्थः। यद्यपि आचार्येण वीतरागकथा-विजिगीषुकथा-भेदेन 'कथा' द्विप्रकारा प्रोक्ता, तथापि पश्चात् तेन विजिगीषुकथायाम् एव जल्पवितण्डयोः उल्लेखः कृतः। अर्थात्, वाद-जल्प-वितण्डा-भेदेन कथा त्रिविधा भवति।

परन्तु, एषा कथा लौकिकविवादस्थले वादिप्रतिवादिनोः स्वपक्षस्थापन-परपक्षखण्डनार्थम् उक्ति-प्रत्युक्तिं न बोधयति, यतो हि लौकिकं वचनं न्यायानुगतं न भवति। अपि च, तत्त्वनिर्णय-जयलाभयोः अन्यतरस्वरूपयोग्यं न्यायानुगतः वचनसन्दर्भः एव 'कथा'। एतदुक्तं विश्वनाथाचार्येण -

---

[15] न्या.सा. – पृ. ३२९

**"तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यन्यायानुगतवचनसन्दर्भः कथा।"4F[16]**

तस्मात् प्रथमोक्त-वादाख्यकथायाः लक्षणप्रसङ्गे महर्षिर्गौतमः निरूपयति- **“प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः”।5F[17]** अर्थात्, प्रमाणैस्तर्कैश्च साधनं (स्वपक्षस्थापनं) तथा उपालम्भः (परपक्षखण्डनं) येषां भवति, ते निर्णयाविरुद्धाः, पञ्चावयवयुक्ताः, वादिप्रतिवादिभ्यां स्वीकृताः एव ‘वादः’।

**निग्रहस्थानस्य स्वरूपम् -**

न्यायदर्शने प्रतिपादितेषु षोडशपदार्थेषु निग्रहस्थानस्य विवेचनं वादविद्यायाः तत्त्वनिर्णय-प्रक्रियायाश्च संरक्षणार्थमत्यन्तमावश्यकं मन्यते। अस्य पदार्थस्य गभीरं परिशीलनं नैयायिकानां तर्कशास्त्रीयां प्रज्ञाम्, बौद्धिकानुशासनं प्रति तेषाम् आदरं च प्रदर्शयति।

कदाचित् प्रश्नोऽयं जायते यत् तत्त्वज्ञानस्य मार्गे पराजयस्य कारणानां गणना किमर्थम् आवश्यकी? अस्य समाधानं न्यायदर्शनस्य व्यावहारिकपक्षे निहितम्।

- **वादमार्गस्य परिशोधनम् -** शास्त्रार्थः अथवा वादः तत्त्वज्ञानप्राप्तेः एकः प्रमुखः उपायः। किन्तु यदि सः अनुशासितो न भवेत्, तर्हि सः केवलं वाक्छले, वितण्डायां, अहङ्कारस्य प्रदर्शने वा परिणमेत्। निग्रहस्थानानि ते नियमाः सन्ति, ये वादं स्वलक्ष्यस्थमेव स्थापयन्ति।

- **तत्त्वनिर्णयप्रक्रियायाः संरक्षणम्:** निग्रहस्थानानां ज्ञानेन वादस्य मध्यस्थः (प्राश्निकः) वादी च स्पष्टतया ज्ञातुं शक्नुवन्ति यत् कुत्रासौ तार्किकः प्रमादः

---

[16] न्या.सू.वृ. १.२.१

[17] न्या.सू. १.२.१

जातः। यदा दोषः स्पष्टतया अभिज्ञायते, तदैव तस्य परिहारः सम्भवति। अतः निग्रहस्थानानि तत्त्वनिर्णयस्य मार्गे कण्टकशोधनस्य कार्यं कुर्वन्ति।

- **बौद्धिकानुशासनस्य प्रतिष्ठापनम् -** निग्रहस्य भयादेव वादी स्वपक्षस्थापने परपक्षखण्डने च अधिकं सावधानो भवति। सः स्वकीयं तर्कं प्रमाणेन, व्याप्तिज्ञानेन, सुसङ्गतया युक्त्या च योजयितुं प्रयतते। अनेन बौद्धिकी निष्ठा अनुशासनञ्च वर्धते।

- **आत्मपरीक्षणस्य साधनम् -** एकः साधकः एतेषां निग्रहस्थानानां ज्ञानेन न केवलं परस्य दोषान् जानाति, अपितु स्वकीयेषु तर्कदोषेषु अपि दृष्टिपातेन परिमार्जनं कर्तुं प्रभवति। अनेन तस्य तार्किकी क्षमता परिष्कृता भवति।

निग्रहस्थानस्य ज्ञानं न केवलं पराजयस्य परिहाराय, अपितु एकस्य स्वस्थस्य, फलप्रदस्य, तथाच तत्त्वनिष्ठस्य शास्त्रार्थवातावरणस्य निर्माणाय अपि अनिवार्यमेव। अतः निग्रहस्थानविवेचनं नैयायिकानां तत्त्वज्ञानमार्गे कण्टकशोधनार्थं कृतः एकः अप्रतिमः बौद्धिकः प्रयासः, यः अद्यापि तर्कशास्त्रस्य अध्येतॄणां कृते प्रकाशस्तम्भवत् तिष्ठति। अनेन सिद्धान्तिनां तत्त्वरक्षणस्य, तथाच वादविद्यायाः अनुशासनेन सत्यान्वेषणस्य च मार्गः सुगमः भवति।

पराजयस्य मूलकारणं द्विविधम्। तदुक्तं न्यायसूत्रे - **‘विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्’**7F[18] **।** अस्य सूत्रस्य अयमाशयः यत्, वादी मुख्यतया द्वाभ्यां कारणाभ्यां पराजीयते -

[18] न्या.सू.१.२.१९

१. **विप्रतिपत्तिः -** विप्रतिपत्तिः नाम **विपरीता अथवा अयथार्था प्रतिपत्तिः (ज्ञानम्)8F[19]।** यदा वादी कर्तव्यस्य विपरीतम् आचरति, यथा साधनाभासेषु (दुष्टहेतुषु) साधनधियम्, दूषणाभासेषु च दूषणधियम् आरोपयति, तदा स विप्रतिपत्त्या निगृह्यते। इयं क्रियात्मिका त्रुटिर्वर्तते।

- **विप्रतिपत्तेः उदाहरणानि -**
    - **प्रतिज्ञाहानि -** स्वप्रतिज्ञायाः त्यागः। यथा - कश्चित् वादी वादम् आरभते - "आत्मा नित्यः"। परन्तु प्रतिवादिनः प्रबलान् तर्कान् श्रुत्वा - 'अस्तु तर्हि, आत्मा अनित्यः' इति वादी वदति। अत्र सः स्वप्रतिज्ञां त्यक्तवान्, अतः 'प्रतिज्ञाहानि' नामकं निग्रहस्थानं प्राप्नोति।
    - **हेत्वन्तरम् -** यदा प्रकृतहेतुः दुष्टः सिद्ध्यति, तदा अन्यस्य हेतोः उपस्थापनम्। यथा - वादी वदति "पर्वतः अग्निमान्, नीलधूमवत्त्वात्"। अत्र 'नीलधूमवत्त्वम्' असिद्धः हेतुः। यदा प्रतिवादी इमं दोषम् उद्घाटयति, तदा वादी झटिति वदति - "अस्तु, तर्हि प्रकाशवत्त्वात्"। एवं हेतोः परिवर्तनं तस्य दौर्बल्यं सूचयति।
    - **निरर्थकम्:** यत्र वर्णानाम् आनुपूर्वी अर्थहीना भवति। यथा - 'कचटतप' इत्यादि अनर्थकं कथनम्।

२. **अप्रतिपत्तिः -** अप्रतिपत्तिस्तु **कर्तव्यविषये अनारम्भः अथवा अज्ञानम्9F[20]।** यथा, यदा वादी परेण स्थापितं पक्षं प्रतिषेद्धुं न शक्नोति, अथवा स्वपक्षे उद्घाटितं दोषं परिहर्तुं नोत्सहते, तदा सः अप्रतिपत्त्या पराजयं लभते। इयम् अकर्मण्यताजनिता त्रुटिः।

- **अप्रतिपत्तेः उदाहरणानि -**

---

[19] विप्रतिपत्तिः विरुद्धा प्रतिपत्तिः। अन्यथाप्रतिपत्तिरिति पर्यवसितार्थः।

[20] परोक्तस्वोक्तयोः अज्ञानम् अप्रतिपत्तिः।

- **अज्ञानम् -** प्रतिवादिना सम्यक् प्रतिपादितस्य विषयस्य त्रिवारम् अभिहितस्यापि अज्ञानम्। - "किं भवान् प्रतिवादिनः तर्कं ज्ञातवान्?" इति पृष्टे सति, ब्रूते "न, अहं न ज्ञातवान्"। इदं तस्य पराजयं सूचयति।
- **अप्रतिभा -** उत्तरस्य स्फुरणमेव न भवेत्। यदा प्रतिवादी तर्कपूर्णं प्रश्नं पृच्छति, तदा वादी अधोमुखः भूत्वा तूष्णीं तिष्ठति, उत्तरं दातुं सर्वथा असमर्थः भवति। इयं 'अप्रतिभा' तस्य निग्रहस्थानम्।
- **विक्षेपः -** वादस्य चर्चां विहाय अन्यत् कार्यं कर्तुम् आरभते। यथा - उत्तरदाने असमर्थः सन् वादी वदति - "अद्य मम अन्यत् आवश्यकं कार्यम् अस्ति, अहं गच्छामि"। एवं चर्चातः पलायनं 'विक्षेपः' नामकं निग्रहस्थानम्।

इमे द्वे एव मूलकारणे द्वाविंशतिविधेषु निग्रहस्थानेषु विस्तृते भवतः। तानि निग्रहस्थानानि च सूत्रकारेण एवं परिगणितानि - **'प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि'10**F[21] इति।

अस्यैवार्थस्य सङ्ग्रहं कुर्वन् भाष्यकारः वात्स्यायनः आह - **'निग्रहस्थानानि खलु पराजयवस्तून्यपराधाधिकरणानीति'11**F[22]**।** अनेन स्पष्टीभवति यत् निग्रहस्थानं नाम

---

[21] न्या.सू. ५.२.४

[22] न्या.भा. ५.२.१.(पृ.सं.६५५)

वादेषु जायमानस्य बौद्धिक-प्रमादस्य अथवा असामर्थ्यस्य परिचायकः स दोषविशेषः, यः साक्षात् पराजये परिणमते।

न्यायशास्त्रे वादविद्यायाः प्रसङ्गे 'निग्रहस्थानम्' इत्यस्य पदार्थस्य निरूपणं क्रियते। येन हेतुना वादी शास्त्रार्थे पराजयं (अपजयम्) प्राप्नोति, स हेतुः 'निग्रहस्थानम्' इति अभिधीयते।12F[23] अर्थात्, वादिनिष्ठायाः पराजयप्रयोजकत्वमेव निग्रहस्थानस्य सामान्यं लक्षणम्13F[24]।

केचन तार्किकाः अस्य लक्षणान्तरमपि वर्णयन्ति, यथा - येन वादिनः वादविषयक-यथार्थज्ञानस्य अभावः सूच्यते, अथवा प्रतिज्ञाहान्यादिषु द्वाविंशतिप्रकारेषु अन्यतमत्वं यस्य भवति, तत् निग्रहस्थानम्।

निग्रहस्थानानां भेदान् परिगणयन् सूत्रकारः पठति - **"प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि"14**F[25] इति।

एते च द्वाविंशतिभेदाः मूलतः **विप्रतिपत्ति-अप्रतिपत्ति**-रूपयोः द्वयोः एव प्रकारयोः अन्तर्भवन्ति15F[26]।

- **तत्र, अप्रतिपत्तिरूपाणि निग्रहस्थानानि वादिनः अज्ञानं निष्क्रियतां वा सूचयन्ति, यथा - अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, पर्यनुयोज्योपेक्षणम् च।**

---

23 त.दी. (पृ.सं.४५)

24 त.दी.स. (पृ.सं.२०६)

25 न्या.सू. ५.२.१.

26 गौ.सू. वृ. १.२.१९

- **शेषाणि सप्तदशनिग्रहस्थानानि, यथा- प्रतिज्ञाहानिः, प्रतिज्ञान्तरम् इत्यादयः, विप्रतिपत्ति-रूपाणि भवन्ति, येषु वादिनः अयथार्था अथवा विपरीता प्रवृत्तिः दृश्यते16F[27]।**

यद्यपि नैयायिकाः द्वाविंशतिविधानि निग्रहस्थानानि अङ्गीकुर्वन्ति, तथापि अस्मिन् विषये मतान्तरम् अपि उपलभ्यते। बौद्ध-तार्किकः धर्मकीर्तिः एतावतां भेदानाम् आवश्यकताम् आक्षिपन् कथयति यत् वस्तुतः पराजयस्य हेतू द्वौ एव भवितुमर्हतः - (१) वादिनः स्वपक्षस्य साधने असामर्थ्यम्, (२) प्रतिवादिनश्च परपक्षस्य दूषणे अक्षमता। यदि वादी स्वपक्षं साधयितुं न शक्नोति, अथवा प्रतिवादी परपक्षं दूषयितुं न प्रभवति, तदैव तयोः पराजयो भवति। तदुक्तं तेनैव -

**असाधननाङ्गवचनमदोषोद्भावनं द्वयोः।**
**निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते॥17**F[28]इति।

**उपसंहारः**

निष्कर्षतः इदं वक्तुं शक्यते यत् न्यायदर्शने 'जातिः' तथा 'निग्रहस्थानम्' केवलं तार्किकदोषौ न स्तः, अपितु तौ वादशास्त्रस्य अनुशासनात्मकौ स्तम्भौ स्तः। 'जातिः' असदुत्तरेषु विद्यमानां तार्किकवञ्चनां प्रकाशयति, यया कश्चित् स्वस्य अज्ञानं छादयितुं प्रयतते। 'निग्रहस्थानम्' तु वादचर्चायां सम्भाव्यमानानां सर्वेषां स्खलनानां, त्रुटीनां, तथा च पराजयकारणानां व्यवस्थितं वर्गीकरणं प्रस्तौति इति।

---

27 न्या.मं. (पृ.सं.177)

28 न्या.मं. (पृ.सं.178)

सहायकग्रन्थसूची -


1. डा. महेश झा, (२०१३), न्यायसूत्रम्, वाराणसी : चौखम्भा संस्कृत सीरीज आफिस।
2. ठाकुर उदय नारायण सिंह (अनुवादक), (२००९), न्यायदर्शनम्, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।
3. केशवमिश्रः, (२००३), तर्कभाषा, चौखम्बा सुरभारती प्रकाशन।
4. वाचस्पति मिश्रः, न्यायवार्तिकतात्पर्य-टीका, चौखाम्भा।
5. देवदत्तशर्मा, (२०१४), तर्कसंग्रह विद्याधरी टीका, समर्थ मिडिया सेंटर।
6. भासर्वज्ञः, न्यायभूषणं, चौखम्बा।
7. विश्वनाथभट्टाचार्यः (१८२८) न्यायसूत्रवृत्तिः, कोलकाता : संस्कृतपाठशाला।
8. आचार्यवरदराजः, पं. विन्ध्येश्वरीप्रसाद द्विवेदी (१९८३ई.), तार्किकरक्षा, वाराणसी।
9. महामहोपाध्याय शंकर मिश्र, वादिविनोदः
10. सुरेन्द्रनाथ दासगुप्ता, (1922), History of Indian Philosophy, कैम्ब्रिज् : विश्वविद्यालयप्रकाशनम्।
11. धर्मकीर्तिः ( 1982), न्यायबिन्दुः, वाराणसी : चौखम्बा संस्कृत संस्थानम्।
12. डॉ. महेन्द्रकुमार जैन (सम्पा.), (1997) हरिभद्रसूरिकृत् षड्दर्शनसमुच्चयः, भारतीयज्ञानपीठ-प्रकाशनम्।